श्रीः

**APEX PON VIDYASHRAM - Velachery**
**Terminal Exam Worksheet ( 2017 -2018 )**
**SANSKRIT – IX**

स्वस्थवृत्तम् , तरवे नमोऽस्तु & भ्रातृस्नेहस्तु दुर्लभः

**Name : ________** **Roll no. : ________**
**Class : IX Section : _____**

## खण्डः क अपठितावबोधनम् –

**अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत ।**

अहम् एका नदी अस्मि । पर्वतेभ्यः निर्गत्य क्षेत्रेषु आगच्छामि । तदा मम सलिलं स्वच्छं शीतलं मधुरं च भवति । प्रपातः मम प्रथमा अवस्था अस्ति । शनैः शनैः अहं सागरं प्रति गच्छामि । मम बालुकायुक्त्तटे हरिताः वृक्षाः भवन्ति । वृक्षाणां उपरि विविधाः खगाः वसन्ति । स्त्रियः कलशान् गृहीत्वा मम तीरे आयान्ति । कतिपयक्षणान् यापयित्वा वार्तालापं कृत्वा जलेन पात्राणि पूरयित्वा ताः इतः गच्छन्ति ।पक्षिणाम् कलरवैः बालकानां क्रीडाभिः स्त्रीणां वार्तालापैः मम तटाः गुञ्जायमानाः भवन्ति परं केचन जनाः भोजनस्य अवशिष्टं मयि एव पातयन्ति । एवम् अवकरैः मम जलं दूषितं भवति ।

**एकपदेन उत्तरत –**

1 केषां उपरि खगाः वसन्ति ?

2 कलशान् गृहित्वा नद्याः तीरे काः आयान्ति ?

**पूर्णवाक्येन उत्तरत–**

1 नद्याः तटाः कथं गुञ्जायमानाः भवन्ति ?

2 नद्याः प्रथमा अवस्था का अस्ति ?

**निर्देशानुसारं उत्तरत –**

1.शनैः शनैः अहं सागरं प्रति गच्छामि अत्र अहम् इति पदं कस्मै प्रयुक्तम् ?

2.जनाः भोजनस्य अवशिष्टं पातयन्ति अत्र क्रियापदं किम् ?

**खण्डः ख –रचनात्मकलेखनम् –**

**मञ्जूषायाम् प्रदत्तपदानाम् सहायतया शुल्कक्षमार्थम् प्रधानाचार्याय लिखितम् प्रार्थनापत्रम् पूरयत –**

मान्याः (i) ____________

(ii) ____________

सविनयम् (iii)__________ अस्ति यत् मम पिता (iv)____________ लिपिकः अस्ति। तस्य परिमिते वेतने परिवारस्य निर्वाहः (v) ______________ क्रियते। विद्यालयस्य (vi) ____________ तु असम्भवम् एव। (vii) ___________ मम अध्ययने (viii) ___________ न स्यात् अतः मम शुल्कम् क्षमा कृत्वा अनुग्रहम् कुर्वन्तु भवन्त।

(ix) ____________

भवताम्

(x) ____________

मञ्जूषा

| | | | | |
|---|---|---|---|---|
| कठिनतया | सधन्यवादम् | महोदय ! | निवेदनम् | आज्ञाकारी-शिष्यः |
| प्राचार्यमहोदयाः | व्यवधानम् | कार्यालये | धनाभावे | शुल्कप्रदानम् |

**खण्डः ग अनुप्रयुक्तव्याकरणम् –**

**अधोलिखितानां प्रश्नानां समुचितम् उत्तराणि लिखत।**

1.ऋ वर्णस्य उच्चारणस्थानं किम् ?

2.घ् वर्णस्य उच्चारणस्थानं किम् ?

3.वर्णसंयोजनं कुरुत। क् + अ + म् + अ + ल् + अ + म्

4.वर्णविन्यासं कुरुत । “विच्छेदम्”

**<u>सन्धिं वा विच्छेदं कुरुत।</u>**

1. वनोत्सवं =
2. एकश्चन्द्रः =
3. पुनः + उवाच =
4. भवन्नियमावसानम् =
5. यदि + अपि =

**<u>उचित विभक्तिपदेन रिक्तस्थानानि पूरयत।</u>**

1.जनाः __________ प्रणमन्ति। ( मुनि )

2.पुत्री __________ पुष्पाणि यच्छति। ( मातृ )

3.__________ सभायां कवितां श्रावयन्ति। ( कवि )

4.__________ किम् नाम्। ( युष्मद् )

5.__________ फलानि रक्तानि सन्ति। ( तत् )

**<u>उचित धातुरूपेण रिक्तस्थानं पूरयत।</u>**

1.त्वम् शिक्षकं प्रशनं । ( प्रच्छ् )

2.अहम् तु गृहं । ( गम् )

3.वयं सदा अध्यापकानाम् आज्ञापालनम्। ( कृ )

4.ये परिश्रमं कुर्वन्ति ते सफलतां। ( लभ् )

5.सः भोजनम्। ( याच् )

**<u>मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत।</u>**

1.इयम् शान्तिसभा अत्र __________ किम् ?

2.तस्मै __________ नमः ।

3. __________ परितः अग्निः ज्वलति ।

4. __________ बहिः वाटिका अस्ति ।

5.सा नायिका __________ निपुणा अस्ति ।

| | | | | |
|---|---|---|---|---|
| गृहात् | भवनं | नृत्यकलायां | कोलाहलेन | शिवाय |

**<u>सन्धिं वा विच्छेदं कुरुत ।</u>**

1. श्रु + त्त्वा =
2. गत्वा =
3. कथ् + तुमुन् =
4 प्र + आप् + ल्यप् =
5. वक्तुं =

**<u>खण्डः घ वबोधनमपठिता —</u>**

**अधोलिखितान् गद्याम्शान् पठित्वा प्रश्नान् उत्तरत –**

इह खलु पन्श्चेन्द्रियाणि पञ्चेन्द्रियद्रव्याणि पञ्चेन्द्रियार्थाः च भवन्ति। तत्र चक्षुः श्रोत्रम् घ्रणम् जिह्वा त्वक् च इति पञ्चेन्द्रियाणि। पञ्चेन्द्रियद्रव्याणि खम् वायुः ज्योतिः आपो भूः इति। पञ्चेन्द्रियार्थाः श्ब्दस्पर्शरूपरसगन्धाः। मनःपुरःसरणि च इन्द्रियाणि अर्थसम्ग्रहसमर्थानि भवन्ति। न इन्द्रियवशगः स्यात्। नम् चम्चलम् मनः अनुभ्रमयेत्।

गुरु-बुद्ध-आचार्यान् अर्चयेत्। मूर्ध - श्रोत्र-घ्राण-पाद-तैलनित्यः स्यात्। अतिथीनाम् पूजकः स्यात्। काले हित-मित-मधुरार्थवादी स्यात्। वश्यात्मा महोत्साहः विनयबुद्धिः निर्भीकः क्षमावान् सर्वप्राणिषु बन्धुभूतः स्यात्

**1. एकपदेन उत्तरत -**

1. इन्द्रियाणाम् कति द्रव्याणि ?

2. इन्द्रियाणाम् कति अर्थाः ?

**2. पूर्णवाक्येन उत्तरत-**

1. मनुष्यः कीदृशः स्यात् ?

2. पञ्चेन्द्रियार्थाः के ?

**3. भाषिककार्यम्-**

1. 'अर्चयेत्' अत्र कः लकारः ?

2. 'मधुरार्थवादी' अत्र सन्धिच्छेदम् कुरुत।

**अधोलिखितान् गद्याम्शन् पठित्वा प्रश्नान् उत्तरत -**

न अनृतम् ब्रूयात्। न अतिब्रूयात्। न अन्यस्वम् आहरेत्। न वैरम् रोचयेत्। न कुर्यात् पापम्। न पापेऽपि पापी स्यात्। न अन्यदोषान् ब्रूयात्। न अन्यरहस्यम् आगमयेत्। अधार्मिकैः न दुष्टैः सह आसीत्। न नासिकाम् कुष्णीयात्। न दन्तान् विघट्टयेत्। न भूमिम् विलिखेत्। न नखान् वादयेत्। न छिन्द्यात् तृणम्। न दुष्टयानानि आरोहेत्। न द्रुमम् आरोहेत्। न जलोग्रवेगम् अवगाहेत्।

न अदेशे, न अकाले, न कुत्सयन्, न प्रतिकूलोपहितम्, न पर्युषितम् अन्नम् खादेत्। न नक्तम् दधि भुञ्जीत। न कञ्चिद् अवजानीयात्। न वेगान् धारयेत्। न अहम्मानी स्यात्। न अभृतभृत्यो, नैकः सुखी, न सर्वविश्रम्भी न सर्वाभिशम्की स्यात्। न नियम् भिन्द्यात्।

**1. एकपदेन उत्तरत -**

1. किम् न ब्रूयात्?

2. किम् न रोचयेत् ?

**2. पूर्णवाक्येन उत्तरत-**

1. कीदृशम् अन्यम् न खादेत्?

2. कैः सह न आसीत् ?

**3. भाषिककार्यम्-**

1. 'ब्रूयात्' अत्र कः लकार?

2. 'साकम्' इत्यस्मिन् अर्थे किम् अव्ययपदम् अत्र प्रयुक्तम्?

3. 'रात्रौ' इति शब्दस्य पर्यायम् अनुच्छेदात् चित्वा लिखत।

4. 'खलै' : इति पदस्य समानार्थकम् पदम् लिखत।

**अधोलिखितम् गद्याम्शम् पठित्वा प्रश्नान् उत्तरत -**

न अदेशे, न अकाले, न कुत्सयन्, न प्रतिकूलोपहितम्, न पर्युषितम् अन्नम् खादेत्। न नक्तम् दधि भुञ्जीत। न कञ्चिद् अवजानीयात्। न वेगान् धारयेत्। न अहम्मानी स्यात्। न अभृतभृत्योः, नैकः सुखी, न सर्वविश्रम्भी, न सर्वाभिशम्की स्यात्। न नियमम् भिन्द्यात्। न कार्यकालम् अतिपातयेत्। न अपरीक्षितम् अभिनिविशेत्। न च अतिदीर्घसूत्री स्यात्। न सिद्धौ उत्सेकम् गच्छेत् न असिद्धौ दैन्यम्।

**1. एकपदेन उत्तरत -**

1. किम् न अभिनिविशेत् ?

2. कस्याम् उत्सेकम् न गच्छेत् ?

**2. पूर्णवाक्येन उत्तरत-**

1. कीदृशम् अन्नम् न खादेत् ?

2. दधि कदा  न भुञ्जीत ?

**3. भाषिककार्यम्-**

1. 'पर्युषितम् अन्नम्' अनयोः पदयोः किम् विशेषणपदम् ?

2. 'अहम्कारी' इत्यस्य स्थाने किम् पदम् अनुच्छेदे प्रयुक्तम् ?

3. 'निन्दयन्' इति पदस्य समानार्थकम्  पदम् लिखत।

4. 'प्रभातम्' इति पदस्य विपरीतभावात्मकम् शब्दम् चित्वा लिखत।

**अधोलिखितम् पद्याम्शम् पठित्वा प्रश्नान् उत्तरत -**

**स्वस्थवृत्तम् यथोद्दिष्टम् यः सम्यगनुतिष्ठति।**

**स समाः शतमव्याधिरायुषा न वियुज्यते॥**

**1. एकपदेन उत्तरत -**

1. अस्माभिः कीदृशम् वृत्तम् पालयितव्यम् ?

2. स्वस्थवृत्तम् कीदृशम् व्याहरेत् ?

**2. पूर्णवाक्येन उत्तरत-**

शतम् समाः कः आयुषा न वियुज्यते

**3. भाषिककार्यम्-**

1. 'वियुज्यते' इति क्रियापदस्य कर्तृपदम् लिखत ।

2. 'वर्षम्' इत्यस्मिन् अर्थे कः पर्यायः अत्र प्रयुक्तम् ?

**निम्नलिखितान् पद्याम्शम् पठित्वा प्रश्नान् उत्तरत -**

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।**

**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥**

**1. एकपदेन उत्तरत -**

1. वृक्षाः स्वयम् कुत्र तिष्ठन्ति ?

2. वृक्षाः छायाम् कस्य कुर्वन्ति ?

**2. पूर्णवाक्येन उत्तरत-**

वृक्षाः परार्थाय किम् किम् कुर्वन्ति ?

**3. भाषिककार्यम्-**

1. 'कुर्वन्ति' इत्यस्य पदस्य कर्तृपदम् किम् ?

2. 'फलान्यपि' अत्र सन्धिच्छेदम् कुरुत।

**अहो! एषाम् वरम् जन्म सर्वप्रण्युपजीवनम्।**

**धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः॥**

**1. एकपदेन उत्तरत -**

1. अर्थिनः केभ्यः निराशाः न यान्ति ?

2. केषाम् जन्म वरम् ?

**2. पूर्णवाक्येन उत्तरत-**

1. के धन्याः? कस्मात् कारणात् च ?

**3. भाषिककार्यम्-**

1. 'महीरुहा' पदस्य अर्थः अस्ति - नृपाः वृक्षाः वा।

2. 'गच्छन्ति' इत्यर्थे अत्र कः शब्दः प्रयुक्तः ?

3. 'एषाम्' इति पदम् केभ्यः प्रयुक्तम् ?

4. महीरुहाः पदस्य अर्थः 'वृक्षाः' अस्ति महिपालाः वा।

**आम्र! यद्यपि गता दिवसास्ते पुष्पसौरभफलप्रचुरा ये।**

**हन्त! सम्प्रति तथापि जनानाम् छाययैव दलयस्यतितापम्॥**

**1. एकपदेन उत्तरत -**

1. आम्रस्य कीदृशाः दिवसाः गताः ?

2. आम्रः कया तापम् दलयति ?

**2. पूर्णवाक्येन उत्तरत-**

आम्रः जनानाम् तापम् कथम् दलयति ?

**3. भाषिककार्यम्-**

1. पुष्पसौरभफलप्रचुराः कस्य विशेषणम् ?

2. 'ये' पदस्य प्रयोगः कस्मै अभवत् ?

3. 'इदानीम्' पदस्य कः पर्यायः अत्र प्रयुक्तम् ?

4. अस्मिन् पदे किम् अव्ययपदम् लिखत ?

**निम्ब! त्वदीयकटुता यदि दाहहन्त्री, गायन्तु मूढमनुजास्तव दोषगाथाः।**

**तप्तास्त एव तपनोपमपित्ततापैः, गास्यन्ति मित्रवर! तावकगीतकानि॥**

**1. एकपदेन उत्तरत -**

1. कस्य कटुता दाहहन्त्री ?

2. निम्बस्य दोषागाथाः के गायन्ति ?

**2. पूर्णवाक्येन उत्तरत-**

के एव निम्बस्य गीतानि गास्यन्ति ?

**3. भाषिककार्यम्-**

1. 'गास्यन्ति' अत्र का धातुः कः च लकारः ?

2. 'गीतकानि' अत्र किम् मूलपदम् प्रयुक्तम् ?

**धत्ते भरम् कुसुमपत्रफलावलीनाम् घर्मव्यथाम् वहति शीतभवाम् रुजम् च।**

**यो सर्वमर्पयति चान्यसुखस्य हेतोः, तस्मै वदान्यगुरवे तरवे नमोस्तु॥**

**1. एकपदेन उत्तरत -**

1. घर्मव्यथाम् शीतभवाम् रुजम् च कः वहति ?

2. अन्यस्य सुखस्य हेतोः सर्वम् कः अर्पयति ?

**2. पूर्णवाक्येन उत्तरत-**

1. तरुः किम् किम् धत्ते ?

2. वृक्षः कस्य रुजम् वहति ?

**3. भाषिककार्यम्-**

1. 'नमोऽस्तु' अत्र सन्धिच्छेदम् कुरुत ।

2. 'तरवे नमोऽस्तु' अत्र 'तरवे' का विभक्तिः किम् च अर्थे प्रयुक्तम् ?

**सुचिरेणापि कालेन यशः किञ्चन्मयार्जितम् ।**

**अचिरेणैव कालेन भरतेनाद्य सञ्चितम् ॥**

**1.एकपदेन उत्तरत -**

रामेण किम् अर्जितम्

अचिरेण एव यशः केन सञ्चितम्

**2. पूर्णवाक्येन उत्तरत-**

सुचिरेणापि कालेन यशः केन अर्जितम्

**3. भाषिककार्यम्-**

1.अचिरेण कालेन अनयोः पदयोः किं विशेषणपदम्

2.सञ्चितम् सन्धिं कुरुत

**अद्य खल्ववगच्छामि पित्रो मे दुष्करम् कृतम्।**

**कीदृशस्तनयस्नेहो भ्रातृस्नेहोऽयमीदृशः॥**

**1.एकपदेन उत्तरत -**

1. केन दुष्करम् कृतम्?

2. कः भ्रातृस्नेहम् अवगच्छति?

**2. पूर्णवाक्येन उत्तरत-**

1. कः कथयति यत् पित्रा मे दुष्करम् कृतम् ?

2. भरतस्य आगमनम् श्रुत्वा राम किम् अवगच्छति?

**3. भाषिककार्यम्-**

1. जानामि 'इत्यर्थे किम् क्रियापदम्' प्रयुक्तम्?

2. अस्मिन् पद्ये किम् अव्ययपदम् प्रयुक्तम्?

**इयम् स्वयम् गच्छतु मानहेतोर्मातेव भावम् तनये निवेश्य।**

**तुषारपूर्णोत्पलपत्रनेत्रा हर्षास्रमासारमिवोत्सृजन्ती॥**

**1.एकपदेन उत्तरत -**

1. रामः भरत स्वागतार्थम् काम् प्रेषयितुम् इच्छति?

2. सीतायाः नेत्रयोः तुलना केन सह अभवत्?

**2. पूर्णवाक्येन उत्तरत-**

सीता कस्य अस्त्रमासारमिवोत्सृजन्ती गच्छति

**3. भाषिककार्यम्-**

1. ‘गच्च्छतु’ पदस्य कर्तृपदम् किम्?

2. ‘निवेश्य’ अत्र का धातुः कः च प्रत्ययः?

**अधोलिखितम् नाटकांशं पठित्वा प्रश्नान् उत्तरत -**

लक्ष्मणः - विलोक्य अये अयम् आर्यः रामः। न न रूपसादृश्यम्। ( सुमन्त्रं विलोक्य ) अये तातः

सुमन्त्रः - अये कुमारः लक्ष्मणः।

भरतः - एवं गुरुः अयम्। आर्य् अभिवादये।

लक्ष्मणः - एहि एहि इक्ष्वाकुकुमार आयुष्मान् भव।

सुमन्त्रः - अनुग्रहीतोऽस्मि

लक्ष्मणः - कुमार इह तिष्ठ। त्वदागमनम् आर्याय निवेदयामि

भरतः - आर्य अचिरम् इदानीम् अभिवादयितुमिच्छामि। शीघ्रं निवेद्यताम्।

**1. एकपदेन उत्तरत -**

1.भरतः कस्य इव अस्ति ?

2.लक्ष्मणः भरतस्य आगमनं कस्मै निवेदयति ?

**2. पूर्णवाक्येन उत्तरत-**

1. भरतः लक्ष्मणं किं निवेदयितुं वदति ?

**3. भाषिककार्यम्-**

1.तातः इति पदं कस्मै प्रयुक्तं ?

**अधोलिखितस्य श्लोकस्य अन्वयम् समुचितम् क्रमेण पूरयत –**

**स्वस्थवृत्तम् यथोद्दिष्टम् यः सम्यगनुतिष्ठति।**

**स समाः शतमव्याधिरायुषा न वियुज्यते॥**

**अन्वयः** - यः यथा उद्दिष्टम् , ______________ सम्यक् अनुतिष्ठति सः, (ii) ___________शतम् (iii) _______________ (iv) ________________ न वियुज्यते।

**आम्र! यद्यपि गता दिवसास्ते पुष्पसौरभफलप्रचुरा ये।**

**हन्त! सम्प्रति तथापि जनानाम् छाययैव दलयस्यतितापम्॥**

**अन्वयः-** आम्र ! यद्यपि ते (i) _____________ गताः (ii) _______________ पुष्पसौरभ (iii) _____________। तथापि सम्प्रति (iv) _____________ एव जनानाम् (v) ______________दलयति।

**धत्ते भरम् कुसुमपत्रफलावलीनाम् घर्मव्यथाम् वहति शीतभवाम् रुजम् च।**

**यो सर्वमर्पयति चान्यसुखस्य हेतोः, तस्मै वदान्यगुरवे तरवे नमोस्तु॥**

**अन्वयः-** यः कुसुमपत्रफलावलीनाम् भरम् (i) _________________। घर्मव्यथाम् वहति (ii) _______________ रुजम् च, (iii) _____________ हेतोः च सर्वमर्पयति तस्मै (iv) __________ तरवे (v)____________ ।

**निम्ब! त्वदीयकटुता यदि दाहहन्त्री, गायन्तु मूढमनुजास्तव दोषगाथाः।**

**तप्तास्त एव तपनोपमपित्ततापैः, गास्यन्ति मित्रवर! तावकगीतकानि॥**

**अन्वयः-** निम्ब! यदि (i) ____________ कटुता दाहहन्त्री (ii) __________ तव (iii) __________ गायन्तु। मित्रवर! ते एव तपनोपमपित्ततापैः तप्ता (iv) __________ गीतकानि (v)___________ ।

**छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।**

**फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥**

**अन्वयः-** अन्यस्य (i) __________ कुर्वन्ति (ii) ___________

च आतपे (iii) ___________ । वृक्षाः (iv) ___________ इव फलानि अपि (v)___________ ।

**अहो! एषाम् वरम् जन्म सर्वप्रण्युपजीवनम्।**

**धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः॥**

**अन्वयः-** अहो! एषाम् सर्व (i) ____________ जन्म (ii)_______________ महीरुहा (iii) ______________ येभ्यः अर्थिनः (iv) __________ न (v)_________ ।

**सुचिरेणापि कालेन यशः किञ्चन्मयार्जितम्।**

**अचिरेणैव कालेन भरतेनाद्य सञ्चितम्॥**

मया (i) _____________ कालेन अपि किञ्चित् (ii)_______________ अर्जितम् भरतेन तु (iii) ______________ अचिरेण कालेन एव यशः (iv) __________ ॥

**अद्य खल्ववगच्छामि पित्रो मे दुष्करम् कृतम्।**

**कीदृशस्तनयस्नेहो भ्रातृस्नेहोऽयमीदृशः॥**

**अन्वयः-** अद्य खलु अवगच्छामि (i) __________________ दुष्करम् (ii)________________ अयम् (iii) _______________________ ईदृशः (iv) __________________ कीदृशः।

**इयम् स्वयम् गच्छतु मानहेतोर्मातेव भावम् तनये निवेश्य।**

**तुषारपूर्णोत्पलपत्रनेत्रा हर्षास्त्रमासारमिवोत्सृजन्ती॥**

**अन्वयः-** माता इव (i) ____________________ भावम् निवेश्य तुषारपूर्ण (ii)________________ हर्षास्त्रमासारम् इव (iii) _______________ इयम् स्वयम् (iv) ________________।

**<u>प्रश्ननिर्माणं कुरुत।</u>**

1.इह खलु **<u>पञ्च</u>** इन्द्रियाणि सन्ति।

2.न **<u>इन्द्रियवशगः</u>** स्यात्।

3.अतिथीनां पूजकः स्यात्।

4.न **<u>अनृतम्</u>** ब्रूयात्।

5.न **<u>नखान्</u>** वादयेत्।

6.नैकः **<u>सुखी</u>** स्यात्।

7.क्षामावान् **<u>सर्वप्राणिषु</u>** बन्धुभूतः स्यात्।

8.**<u>गुरु वृध्द आचार्यान्</u>** अर्चयेत्।

9.वृक्षाः स्वयम् **<u>आतपे</u>** तिष्ठन्ति।

10.मम **<u>मूले</u>** भुजङ्गाः सन्ति।

11.**<u>चन्दनस्य</u>** मूलं भुजङ्गैः आश्रितम्।

12.मूढमनुजाः तव **<u>दोषगाथाः</u>** गायन्तु।

13.**<u>वृक्षाणां</u>** जन्म धन्यम्।

14.चन्दनस्य शाखाः **<u>वानरैः</u>** आश्रिताः।

15.वृक्षाः **<u>कामान्</u>** वितन्वते।

16.वदान्यगुरवे **<u>तरवे</u>** नमः अस्तु।

17.वृक्षाः <u>**परार्थाय**</u> फलानि यच्छन्ति ।

<u>**शब्दार्थमेलनं कुरुत ।**</u>

| | | | |
|---|---|---|---|
| 1. | मित | - | जलम् |
| 2. | पाद | - | अल्प |
| 3. | द्रुमम् | - | चरणम् |
| 4. | नक्तम् | - | समयं |
| 5. | आपः | - | सफलतायाम् |
| 6. | सिध्दौ | - | असत्यम् |
| 7. | अनृतम् | - | निशायाम् |
| 8. | कालं | - | वर्षं |
| 9. | समाः | - | वृक्षम् |
| 10. | वृक्षः | | सर्पं |
| 11. | कुसुम | | तरवः |
| 12. | भुजङ्गैः | | पुष्प |

श्रीः

**APEX PON VIDYASHRAM - Velachery**
**Terminal Exam Worksheet ( 2017 -2018 )**
**SANSKRIT – IX**

वेद्यय भान्ति सद्गुणाः , कर्मणा याति संसिध्दिं &

भ्रातृस्नेहस्तु दुर्लभः

**Name : ________** **Roll no. : ________**
**Class : IX Section : _____**

## खण्डः क अपठितावबोधनम् –

एकदा भोजः नाम नृपः आसीत्। प्रजापालने अतिकुशलः सः स्नेहेन प्रजाः अपालयत्। परं नृपस्य पुत्राः मूर्खाः अशिक्षिताः गुणहीनाः च आसन्। एतस्मात् कारणात् राजा अतीव चिन्ताकुलः आसीत्। 'किं करोमि? कथं एतान् विद्याहीनपुत्रान् सर्वगुणसम्पन्नान् करोमि?' इति विचिन्त्य, सः अग्रिमे दिवसे राजसभायां आगत्य अघोषयत् – "अस्ति कश्चित् विद्वान् पण्डितः यः मम मूर्खपुत्रान् नीतिनिपुणान् कर्तुं समर्थः भवेत्?" एतदाकर्ण्य देवदत्तनाम पण्डितः किञ्चित् विचार्य नृपं भोजं उत्साहपूर्वकं अवदत् – "महाराज! अहं एतान् राजकुमारान् नीतिशास्त्रेषु निपुणान् कर्तुं समर्थोऽस्मि। ततः ते राजकुमाराः विद्यालाभाय देवदत्तपण्डितेन सह अगच्छन्। असौ पण्डितः पशु-पक्षि-जन्तूनां कथाभिः तेषां राजपुत्राणां मनोरञ्जनम् कुर्वन् सरलतया तेभ्यः नीतिशास्त्रज्ञानं अशिक्षयत्।

I. <u>एकपदेन उत्तरत</u>

1. नृपस्य नाम किम् आसीत्?
2. नृपस्य पुत्राः कीदृशाः आसन्?

II. <u>पूर्णवाक्येन उत्तरत</u>

1. देवदत्तः केन प्रकारेण राजकुमारान् अशिक्षयत्?

III. निर्देशानुसारं प्रदत्तविकम्पेभ्यः उचितं उत्तरं चित्वा लिखत

1. 'आसन्' इति क्रियापदस्य कर्तृपदं किम्?
2. 'सः अग्रिमे दिवसे राजसभायां आगत्य अघोषयत्' - अत्र सः सर्वनामपदं कस्मै प्रयुक्तम्?
3. 'नृपस्य पुत्राः गुणहीनाः आसन्' - अत्र विशेषणपदं किम्?
4. 'शिक्षिताः' इति पदस्य कृते किं विलोमपदम्?

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

## *खण्डः ख –रचनात्मकलेखनम्*

I. भवान् चन्द्रः। भवतां विद्यालये सम्स्कृतस्य सम्भाषणशिबिरं आयोजितं आसीत्। स्व-अनुभवान् वर्णयन् भवान् स्वमित्रं सुरेशं प्रति पत्रं लिखति। परन्तु मध्ये कानिचित् पदानि त्यक्तानि। पत्रं पूरयित्वा पुनः उत्तरपुस्तिकायां लिखतु। सहायतायै अधः मञ्जूषा दत्ता।

अ 77 शालीमार बाग

i. …………..

दिनाङ्कः 13.4.2012

प्रिय ii. …………

iii………….

अत्र सर्वगतं कुशलम्। मन्ये भवानपि कुशली। गतसप्ताहे अस्माकं विद्यालये सम्स्कृतसम्भाषणशिबिरं सम्योजितं आसीत्। दश दिनानि वयं सम्स्कृतेन सम्भाषणस्य iv…………. कृतवन्तः। एकस्याः लघुनाटिकायाः मञ्चनमपि v………..अकुर्म। अहं तु विदुषकस्य् vi……………कृतवान्। सर्वे जनाः vii………… वारं वारं करतालध्वनिं

अकुर्वन्। अहं तु इदानीं सर्वदा सम्स्कृतेन एव वदामि। मम शिक्षकाः अपि viii………
स्नेहं कुर्वन्ति। त्वमपि प्रयत्नं कुरु। नूनं यशस्वी भविष्यसि। पितरौ प्रति मम प्रणमञ्जलिः निवेदयतु।

भवतां अभिन्नहृदयः

चन्द्रः

मञ्जूषा

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| इन्द्रपुरीतः | हसित्वा | अभ्यासं | सुरेश | सस्नेहं नमस्ते | वयम् | अभिनयं | मयि |

II. <u>मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखत।</u>



मञ्जूषा

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| हस्ते | महिलायाः | उपरि | उपनेत्रम् | पुरुषः | जनाः | मेलकम् | पृष्ठे | पश्यति | भ्रमणाय |

1.

2.

3.

4.

5.

## खण्डः ग अनुप्रयुक्तव्याकरणम् –

**अधोलिखितानां प्रश्नानां समुचितम् उत्तराणि लिखत।**

1.ह् प् च् ढ् वर्णेषु कः वर्णः कण्ठ्यः अस्ति ?

2.ऊ वर्णस्य उच्चारणस्थानं किम् अस्ति ?

3.वर्णसंयोजनं कुरुत। य् अ ज् ञ् ई य् अः

4.वर्णविन्यासं कुरुत ।सम्राट्

**सन्धिं वा विच्छेदं कुरुत।**

1. नमः + ते =
2. सूर्य + उदयः =
3. वागीशः =
4. एकेन + अपि =
5. ममापि =

**उचित विभक्तिपदेन रिक्तस्थानानि पूरयत।**

1.तस्यै __________ नमः। ( मातृ )

2.__________ जलम् अतीव पवित्रं विद्यते। ( गंगा )

3.अहम् __________ जलम् आनयामि। ( युष्मद् )

4.__________ मम माता सर्वैः भ्रातृभिः पूजनीया।( इदम् )

5.__________ स्वादं मिष्टं वर्तते। ( मधु )

**उचित धातुरूपेण रिक्तस्थानं पूरयत।**

1.रावणः त्रेतायुगे सीताम् __________। ( हृ )

2.सः चर्मणे मृगं __________। ( हन् )

3.अधुना रात्रौ किं भवान् __________ ? ( लभ् )

4.श्वः मम माता पूरिकाः __________ । ( पच् )

5.नायिकाः सुन्दरम् __________ । ( नृत् )

**<u>मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत ।</u>**

1.पर्यटकः __________ पुरतः गच्छति ।

2. __________ बहिः रक्षकः तिष्ठति ।

3. रामः __________ समर्थः ।

4. __________ उभयतः छात्राः सन्ति ।

5.पुरोहितः वारं वारं __________ स्वाहा इति उक्त्वा आहुतीः कारयति ।

| | | | | |
|---|---|---|---|---|
| रावणाय | अग्नये | गृहात् | ग्रामस्य | गुरुम् |

**<u>प्रकृति प्रत्यय विभागानां प्रत्यान्तपदं लिखित ।</u>**

1. आ + रुह् + ल्यप् =
2. लब्ध्वा =
3. प्रणम्य =
4. श्रोतुं =

**<u>खण्डः घ पठितावबोधनम —</u>**

**अधोलिखितान् श्लोकान् पठित्वा प्रदत्तान् प्रश्नान् उत्तरत –**

**अनेकसम्शयोच्छेदि परोक्षार्थस्य दर्शकम्।**

**सर्वस्य लोचनम् शास्त्रम् यस्य नास्त्यन्थ एव सः॥**

**1. एकपदेन उत्तरत -**

1. अनेकसम्शयोच्छेदि किम् ?

2. सर्वस्य लोचनम् किम् ?

**2. पूर्णवाक्येन उत्तरत-**

अन्धः कः ?

**3. भाषिककार्यम्-**

1. 'दर्शकम्' इति कस्य विशेषणम् ?

2. 'नास्त्यन्ध' अत्र सन्धिच्चेदम् कुरुत।

**यौवनम् धनसम्पत्तिः प्रभुत्वमविवेकिता।**

**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥**

**1. एकपदेन उत्तरत -**

1. प्रभुत्वम् अपि कस्मै भवितुम् शक्नोति ?

2. धनसम्पत्तिः कस्मै भवितुम् शक्नोति ?

**2. पूर्णवाक्येन उत्तरत-**

अनर्थाय किम् भवति ?

**3. भाषिककार्यम्-**

1. 'अप्यनर्थाय' अत्र सन्धिच्छेदम् कुरुत।

2 .'अनर्थाय' अत्र का विभक्तिः ?

**स जातो येन जातेन याति वम्शः समुन्नतिम् ।**

**परिवर्तिनि सम्सारे मृतः को वा न जायते॥**

**1. एकपदेन उत्तरत -**

1. सम्सारः कीदृशः भवति ?

2. सः एव जातः येन जातेन वम्शः किम् प्राप्नोति ?

**2. पूर्णवाक्येन उत्तरत-**

परिवर्तिनि सम्सारे कः जातः ?

**3. भाषिककार्यम्-**

1. जातः अत्र कः प्रत्ययः ?

2. 'गच्छति' शब्दस्य कौ पर्यायः अत्र पयुक्तम् ?

**अधोलिखितान् श्लोकान् पठित्वा प्रदत्तान् प्रश्नान् उत्तरत –**

**वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।**

**एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि॥**

**1. एकपदेन उत्तरत -**

1. कीदृशः पुत्रः वरम् ?

2. कीदृशाः पुत्राः न भवेयुः ?

**2. पूर्णवाक्येन उत्तरत-**

तमः कः हन्ति ?

**3. भाषिककार्यम्-**

1. 'एकश्चन्द्रस्तमो' अत्र सन्धिच्छेदम् कुरुत ।

2. 'अन्धकारः' इत्यर्थे कः पर्यायः प्रयुक्तम् ?

**कीटोऽपि सुमनः सङ्गादारोहति सताम् शिरः।**

**अश्मापि याति देवत्वम् महद्भिः सुप्रतिष्ठितः॥**

**1. एकपदेन उत्तरत -**

1. कीटः कस्य सम्गात् सताम् शिरः आरोहति ?

2. महद्भिः प्रतिष्ठितः कः देवत्वम्  याति ?

**2. पूर्णवाक्येन उत्तरत-**

देवत्वम् कः याति किमर्थम् च ?

**3. भाषिककार्यम्-**

1. 'सताम्' पदे का विभक्तिः ?

2. 'सुप्रतिष्ठित' पदे कः प्रत्ययः ?

**माता शत्रुः पिता वैरी येन बालो न पठितः।**

**न शोभते सभमध्ये हम्समध्ये बको यथा॥**

**1. एकपदेन उत्तरत -**

1. अपठितः बालः कुत्र न शोभते ?

2. हम्समध्ये कः न शोभते ?

**2. पूर्णवाक्येन उत्तरत-**

कीदृशी माता कीदृशः च पिता बालस्य शत्रुः ?

**3. भाषिककार्यम्-**

1. शोभते अत्र का धातुः ?

2. पद्याम्शात् द्वौ अव्ययपदौ चित्वा लिखत।

**पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्ना।**

**यावद् भवानेष्यति कार्यसिद्धिम् तावद्भविष्याम्यनयोर्विधेयः॥**

**1. एकपदेन उत्तरत -**

1. भरतः रामम् किम् अयाचत?

2. भरतः कयोः विधेयः भवितुम् इच्छति?

**2. पूर्णवाक्येन उत्तरत-**

भरतः कस्य कार्यसिद्धिम् विषये कथयति?

**3. भाषिककार्यम्-**

1. 'भवानेष्यति' अत्र सन्धिः भवति सम्योगे वा।

2. 'एते' पदम् कयोः प्रयुक्तम्?

3. 'प्रणताय' इति कस्य विशेषणम् अस्ति?

4. 'एष्यति' अत्र का धातुः कः च लकारः?

**यावद् भविष्यति भवन्नियमावसानम्!।**

**तावद् भवेयमिह ते नृपे! पादमूले॥**

**1. एकपदेन उत्तरत -**

1. कस्य नियमावसानम् भविष्यति?

2. भरत कस्य पादमूले निवस्तुम् इच्छति?

**2. पूर्णवाक्येन उत्तरत-**

भरतः कुत्र निवासम् कर्तुम् इच्छति?

**3. भाषिककार्यम्-**

1. 'नृप' पदम् कस्मै प्रयुक्तम्?

2. 'भवेयमिह' अत्र सन्धिः अस्ति सम्योगो वा।

**<u>अधोलिखितान्  गद्यांशं  पठित्वा प्रश्नान् उत्तरत –</u>**

आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः । एकदा यदा स तरुछायायामुपविष्टः आसीत् तदा तस्योपरि एका बलाका विष्ठाम् उदसृजत्। स च क्रुध्दस्तां व्यलोकयत्। दृष्टमात्रा एव बलाका भस्मसाद् अभूत्। ततश्च स मुनिः तपः शक्तिप्रभावाद् अहंकारम् उपगतः ।

**1. एकपदेन उत्तरत -**

1.मुनिः कुत्र उपविष्टः आसीत्

2.मुनिः कुत्र निवसति स्म

**2. पूर्णवाक्येन उत्तरत-**

1.दृष्टमात्रा बलाका कीदृशी अभूत्

**3. भाषिककार्यम्-**

1.महातपा इति विशेषणस्य विशेष्यं किम्

2.उदसृजत् इति क्रियायाः कर्तृपदम् किम्

**<u>अधोलिखितान्  गद्यांशं  पठित्वा प्रश्नान् उत्तरत –</u>**

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षां आदाय मुनेः अन्तिकं आगता। स च मुनिः बद्धाञ्जलिः तां अवदत् – “कथं त्वया अनन्यगोचरो बकवृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहिष्ये।“ सा अवदत् – “मुने! न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं कञ्चन माम्सविक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति। त्वं च निरहङ्कारः भविष्यसि”, इति। एवम् सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः सः मुनिः तां प्रणम्य तद्गृहात् निरगच्छत्।

I. <u>एकपदेन उत्तरत</u>

i. गृहिणी कस्य सेवं कृत्वा मुनेः अन्तिकं आगता?

ii. अनन्यगोचरः कः अस्ति?

II. <u>पूर्णवाक्येन उत्तरत</u>

i. मुनिः बद्धञ्जलिः भूत्वा गृहिणिं किं अवदत्

III. <u>निर्देशानुसारं उचितं उत्तरं लिखत</u>

i. 'पतिव्रतया' इति पदस्य विशषणपदं किम्?

ii. अनुच्छेदे 'समीपं' इति पदाय अन्यत् किं पदं प्रयुक्तम्?

**<u>अधोलिखितान् गद्यांशं पठित्वा प्रश्नान् उत्तरत –</u>**

साऽवदत् मुने न भतृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं कञ्चन मांसविक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति त्वं च निरहङ्कारः भविष्यसि इति। एवं सर्वविदा पतिव्रतया अभिहितः गृहात् अतिथिसत्कारः सः मुनिः तां प्रणम्य तद्गृहाद् निरगच्छत्। अन्येद्युः सः मुनिः समन्विष्य तं धर्मव्याधं विपणिस्थं मांसानि विक्रीणन्तम् उपगच्छत्।

**1. एकपदेन उत्तरत -**

1.कीदृशः सः मुनिः गृहिणीं प्रणम्य तद्गृहात् निरगच्छत् ?

2.मांसविक्रयिणः नाम किम् आसीत् ?

**2. पूर्णवाक्येन उत्तरत-**

1.अन्येद्युः सः मुनिः किम् अकरोत् ?

**3. भाषिककार्यम्-**

1.प्राविशत् इति पद्स्य विपरीतार्थकं पदं चित्वा लिखत ।

2.ततस्ते श्रेयो भविष्यति अस्मिन् वाक्ये ते इति सर्वनामपदं कस्मै प्रयुक्तम् ?

**<u>अधोलिखितान् गद्यांशं पठित्वा प्रश्नान् उत्तरत –</u>**

अन्येद्युः स मुनिः समन्विष्य तम् धर्मव्याधम् विपणिस्थम् माम्सानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एव तम् मुनिम् अभाषत – “ब्रह्मन्! किम् पतिव्रतया तया इह त्वम् प्रेशितः”? तत् आकर्ण्य स मुनिर्विस्मितः तम् धर्मव्याधम् अवदत् – “भद्र! माम्सविक्रयिणः ते कथम् ईदृशम् विज्ञानम्”? धर्मव्याधः अवदत् – “ब्रह्मन्! अहम् मातापित्रोर्भवतः। तौ हि मम परायणम्। अहम् तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनम् स्वीकरोमि। शाययित्वा च स्वपिमि। तेन मे एतादृशम् विज्ञानम्। अन्यहतानाम् च मृगादीनाम् माम्सानि स्वधर्मम् इति मत्वा वृत्त्यर्थम् विक्रीणे, न तु धनलिप्सया। हे मुने! ज्ञानविघ्नोऽहङ्कारः। अतः स्वधर्मम् चर, येन आशु परम् श्रेयः अवाप्स्यसि”।

**1.एकपदेन उत्तरत -**

1. मातापित्रोर्भवतः कः आसीत् ?

2. मुनिः केन अनुशिष्टः अभवत् ?

**2. पूर्णवाक्येन उत्तरत-**

1. धर्मव्याधः दृष्ट्वा एव तम् मुनिम् किम् अभाषत ?

2. विस्मितः मुनिः धर्मव्याधम् किम् अपृच्छत ?

**3. भाषिककार्यम्-**

1. ‘आशु’ पदस्य अर्थः अस्ति - आशा शीघ्रम् वा।

2. 'स्वपिमि' पदस्य कर्तृपदम् किम् ?

3. 'विक्रीणन्तम्' अत्र का धातुः कः च प्रत्ययः ?

4. 'मुनिर्विस्मितः'अत्र सन्धिच्छेदम् कुरुतः।

**<u>अधोलिखितान्  नाटकांशं  पठित्वा  प्रश्नान् उत्तरत –</u>**

**रामः -** मे शापितो न परिरक्षसि चेत् स्वराज्यम्।

**भरतः –** हन्त! अनुत्तरम् अभिहितम्। भवतु, समयतः ते राज्यम् परिपालयामि।

**रामः –** वत्स! कः समयः ?

**भरतः -** मम हस्ते निक्षिप्तम् तव राज्यम् चतुर्दशवर्शान्ते प्रतिग्रहीतुम् इच्छामि।

**रामः -** एवमस्तु।

**भरतः –** आर्य! अन्यमपि वरम् हर्तुम् इच्छामि।

**रामः –** वत्स! किमिच्छसि? किमहम् ददामि? किम् अहम् अनुष्ठास्यामि?

**1. एकपदेन उत्तरत -**

1. अनुत्तरः कः अभवत् ?

2. भरतः समयतः किम् परिपालयति?

**2. पूर्णवाक्येन उत्तरत-**

भरतस्य समयः कः आसीत्?

**3. भाषिककार्यम्-**

1. 'यदि' अस्य पर्यायम् अनुच्छेदात् चित्वा लिखत।

2. 'निक्षिप्तम्' अत्र कः प्रत्ययः?

3. 'इच्छामि' अस्य पदस्य कर्तृपदम् किम्?

4. 'शापितः' अत्र का धातुः?

**अधोलिखितानाम् श्लोकानाम् अन्वयम् रिक्तस्थानानि पूरयत् –**

**1. अनेकसम्शयोच्छेदि परोक्षार्थस्य दर्शकम्।**

**सर्वस्य लोचनम् शास्त्रम् यस्य नास्त्यन्थ एव सः॥**

**अन्वयः-** अनेक (i) ____________ परोक्षार्थस्य (ii)_________ सर्वस्य (iii) ____________ शास्त्रम् यस्य न अस्ति सः (iv) ____________ एव ।

**2. यौवनम् धनसम्पत्तिः प्रभुत्वमविवेकिता।**

**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्॥**

**अन्वयः-** यौवनम् (i) ____________ (ii) ____________ अविवेकिता एकैकम् अपि (iii) ______________ यत्र (iv) ____________ किम्।

**3. स जातो येन जातेन याति वम्शः समुन्नतिम् ।**

**परिवर्तिनि सम्सारे मृतः को वा न जायते॥**

**अन्वयः-** येन (i) ___________ वम्शः समुन्नतिम् याति स (ii)___________ परिवर्तिनि (iii) ___________ कः (iv) __________ वा न जायते।

**4. वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।**

**एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि॥**

**अन्वयः-** एकः (i) ___________ पुत्रः वरम् (ii)__________ अपि न च एकः चन्द्रः (iii) ________________ हन्ति (iv) ___________ अपि न च।

**पादोपभुक्ते तव पादुके मे एते प्रयच्छ प्रणताय मूर्ध्नां।**

**यावद् भवानेष्यति कार्यसिद्धिम् तावद्भविष्याम्यनयोर्विधेयः॥**

**अन्वयः-** तव पादोपभुक्ते एते (i) ________________ मूर्ध्नां। (ii)________________ मे प्रयच्छ । यावत् भवान् (iii) ______________ एष्यति तावत् (iv) ______________ विधेयः भविष्यामि।

**प्रश्ननिर्माणं कुरुत ।**

1.**सर्वस्य** लोचनं शास्त्रं भवति ।

2.एक **गुणी** पुत्रः वरम् ।

3.बकः **हंसमध्ये** न शोभते ।

4.येन जातेन **वंशः** समुन्नतिं याति ।

5.**सः** विहस्य अभाषत् ।

6.**मुनिना** बलाका भस्मी कृता ।

7.महातपा नामो **मुनिः** आसीत् ।

8.**तौ** हि मम परायणम् ।

9.ज्ञाने विघ्नः **अहङ्कारः** ।

10.किमेवं **भरतः** प्राप्तः ।

11.अथवा **त्वम्** तिष्ठ ।

12.**पित्रा** मे दुष्करं कृतम् ।

13.कश्चित् **भक्तिमान्** आगतः ।

14.त्वदागमनम् **आर्यय** निवेदयामि ।

15.**अचिरम्** अभिवादयितुम् इच्छामि ।

16.अयं ते **दयितः** भ्राता भरतः आगतः ।

17.**भरतः** अहम् अस्मि ।

18.**समयतः** ते राज्यं परिपालयामि ।

19.अन्यमपि **वरं** हर्तुम् इच्छामि ।

**शब्दार्थमेलनं कुरुत ।**

1. तीरे - तटे

| | | | |
|---|---|---|---|
| 2. | राजा | - | अन्धकारः |
| 3. | तमः | - | पाषाणम् |
| 4. | अश्म | - | नृपः |
| 5. | अचिरम् | - | गुणिनाम् |
| 6. | मूर्ध्ना | - | दर्पण |
| 7. | अर्जितम् | - | शीघ्रम् |
| 8. | विधेयः | - | प्राप्तम् |
| 9. | विग्रहवत् | - | शिरसा |
| 10. | आदर्श | - | मूर्ति इव |
| 11. | सारवताम् | - | अधीनः |